घनः ५ बली ६ । अस्य गुणाः । गुरुत्वम् । सन्धिविश्लेषकारित्वम् । मृदुत्वम् । प्रमर्द्दनत्वम् । स्निग्धत्वम् । कटुत्वम् । शीतत्वम् । जड़ताकारित्वम् । शुक्लत्वम् । शीते वसन्ते निशामुखे पूर्व्वाह्ने भुक्ते च प्रकोपणत्वम् । इति राजनिर्घण्टः ॥ * ॥ अस्य प्रकोपहेतुः । "गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः संप्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते" ॥ * ॥ तस्य कर्म्माणि । "स्तिमित्यं मधुरास्यता शिशिरता शौक्ल्यं प्रसेको मलप्राचुर्य्यं स्थिरता रसस्य लवणः कण्डूरतिस्वप्नता । आलस्यं चिरकारिता कठिनता शोथाश्चिरस्निग्धता तन्द्राष्टम्भगदेहकासगुरुता एताः कफोत्था रुजः" ॥ * ॥

अस्य प्रशमताकारणम् ।

"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः ।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः" ॥
"रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम् ।
धूमात्युष्णशिरोविरेकवमनस्वेदोपवासादिकं
पानाहारविहारभेषजमिदं श्लेष्मामयं जयेत्" ॥

स च पञ्चविधो यथा,—

"अवलम्बक इत्येकः क्लेदकः श्लेषकोऽपरः ।
बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः" ॥ * ॥

एतेषां लक्षणानि यथा,—

"कफधाम्नान्तु शेषाणां यत्करोत्यवलम्बनम् ।
ततोऽवलम्बकाख्यातिं श्लेष्मा प्राप्नोत्युरःस्थितः ॥ १ ॥
आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः ॥ २ ॥
श्लेषकश्लेषणात् सन्धेः स च सन्धौ व्यवस्थितः ॥ ३ ॥
रसनावस्थितश्चैव बोधको रसबोधनात् ॥ ४ ॥
शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात् ॥ ५ ॥" *

अस्य स्थानानि ।

"उरःकण्ठशिरः क्लोमपर्व्वाण्यामाशयो रसः ।
मेदो घ्राणञ्च जिह्वा च कफस्थानमुरः परम्" ॥ * ॥

(सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति । इति तु प्रकारभेदेनास्य कार्य्यमुक्तम् ॥

अतः परमस्य क्षीणलक्षणमाह ।

श्लेष्मक्षये कक्षतान्तर्दाह आमाशयेतराशयशिरसां शून्यता सन्धिशैथिल्यं तृष्णा दौर्ब्बल्यं प्रजागरणञ्च । तत्र स्वयोनिवर्द्धनद्रव्याण्येव प्रतीकारः ॥ अतःपरमस्यातिवृद्धौ यल्लक्षणं तदाह ॥

श्लेष्मवृद्धौ शौक्ल्यं शैत्यं स्थैर्य्यं गौरवमवसादस्तन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च ॥)

तत्प्रकृतिकस्य लक्षणम् ।

"गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः ।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः" ॥ * ॥

(अपरञ्च यथाह हारीतः ।

"सुस्निग्धवर्णः सितनेत्रदीप्तः
श्यामः सुकेशो न च दीर्घरोमा ।
गम्भीरशब्दः श्रुतशास्त्रनिष्ठा-
तन्द्राप्रियस्तिक्तकटूष्णभोजी ॥
सुमांसलः स्निग्धरसप्रियश्च
संगीतवाद्योऽतिसहिष्णुचित्तः ।
व्यायामशीलो रतलालसोऽसौ
भवेत् कफात्मप्रकृतिर्मनुष्यः ॥
शुक्लाक्षः स्थिरकुटिलातिनीलकेशो
लक्ष्मीवान् जलदमृदङ्गसिंहघोषः ।
सुप्तः सन् सकमलहंसचक्रवाकान्
सम्पश्येदपि च जलाशयान् मनोज्ञान् ॥
रक्तान्तनेत्रः सुविभक्तगात्रः
स्निग्धच्छविः सत्त्वगुणोपपन्नः ।
क्लेशक्षमो मानयिता गुरूणां
ज्ञेयो बलासप्रकृतिर्मनुष्यः ॥
दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु ।
परिनिश्चितवाक्यपदः सततं
गुरुमानकरश्च भवेत् स सदा ॥
ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः ।
तार्क्ष्यहंससमानूकाः श्लेष्मप्रकृतयो नराः" ॥
इति सुश्रुतश्च ॥

श्लेष्मस्थानान्यत ऊर्द्ध्वं वक्ष्यामः । तत्रामाशयपित्ताशयस्योपरिष्टात् तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात्तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः । स च तत्रौदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसंघातः सुखजरश्च भवति ।

"माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च ।
आमाशये सम्भवति श्लेष्मामधुरशीतलः" ॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति । उरस्थः-स्त्रिकसन्धारणमात्मवीर्य्येणान्नरससहितेन हृदयावलम्बनं करोति । जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते । शिरस्थः स्नेहसन्तर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति । सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति ॥ भवति चात्र ।

"श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च ।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः" ॥)

तस्याविकृतस्य कर्म्म ।

"स्नेहो बन्धः स्थिरत्वञ्च गौरवं वृषता बलम् ।
क्षमा धृतिरलोभश्च कफकर्म्माविकारजम्" ॥ * ॥
इति सुखबोधः ॥ फेनः । यथा अब्धिकफः इत्यादि ॥

कफकूर्चिका, स्त्री, (कफं कूर्चति विकृतं करोतीति । कफ + कूर्च + विकारे + ण्वुल् + टाप् इत्वञ्च ।) लाला । लाल् चतु सिकनि इत्यादि भाषा ॥ तत्पर्य्यायः । सृणीका २ स्यन्दिनी ३ लाला ४ आस्यासवः ५ । इति हेमचन्द्रः ॥

कफघ्नी, स्त्री, (कफं कफविकृतिं हन्तीति । कफ + हन् + टक् + ङीप् ।) क्षुपभेदः । इति राजनिर्घण्टः ॥ (यथा, राजनिर्घण्टे शताह्वादिवर्गे चतुर्थः ।

"शीघ्रशत्रुविमर्द्दी च कफघ्नी चापराजिता" ॥)

कफणिः, पुं, स्त्री, (केन सुखेन फणति अनायासेन सङ्कोचविकोचनत्वं प्राप्नोति स्फुरति वा । फण गतौ, स्फुर सञ्चलने इति वा धातोः इन् पृषोदरादित्वात् साधुः ।) कफोणिः । इति हेमचन्द्रः ॥

कफवर्द्धनः, पुं, (कफं कफजनितं विकारं वर्द्धयतीति । कफ + वृध् + णिच् + ल्युः ।) पिण्डीतगरवृक्षः । इति त्रिकाण्डशेषः ॥ श्लेष्मवृद्धिकारके त्रि । इति वैद्यकं ॥ (दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवनैषधोत्कटमाषमहामाष-गोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाबिसमृणालकशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्माप्रकोपमापद्यते ॥

"सशीतैः शीतकाले च वसन्ते च विशेषतः ।
पूर्व्वाह्ने च प्रदोषे च भुक्तमात्रे प्रकुप्यति" ॥
इति सुश्रुतः ॥)

कफविरोधि, क्ली, (कफं विशेषेण रुणद्धीति । कफ + वि + रुध् + णिनिः ।) मरिचम् । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । मरिचशब्देऽस्य गुणा ज्ञेयाः ॥)

कफान्तकः, पुं, (कफस्य अन्तकः नाशकः । यद्वा । कफं अन्तयतीति । कफ + अन्त + करोत्यर्थे णिच् + ण्वुल् ।) वर्व्वुरवृक्षः । इति राजनिर्घण्टः ॥ (अस्य गुणादिकं वर्व्वूरशब्दे द्रष्टव्यम् ॥ कफनाशके, त्रि ॥)

कफारिः पुं, (कफस्य अरिः दमयितेत्यर्थः ।) शुण्ठी । इति राजनिर्घण्टः ॥ (श्लेष्मनाशके, त्रि । शुण्ठीशब्देऽस्य विशेषो ज्ञेयः ॥)

कफी, [न्] त्रि, (कफोऽस्त्यस्य । कफ + अस्त्यर्थे । "द्वन्द्वोपतापेति" । ५ । २ । १२८ । इनिः ।) श्लेष्मयुक्तः । तत्पर्य्यायः । श्लेष्मलः २ श्लेष्मणः ३ । इत्यमरः । २ । ६ । ६० ॥ गजे पुं । इति सारस्वतः ॥

कफेलूः, त्रि, (कफं लाति आदत्ते इति । कफ + ला आदाने + "अन्दू-दृम्फू-जम्बू-कम्बू-कफेलू-कर्कन्धू-दिधिषु" । उणां १ । ९५ । इति कुप्रत्ययान्तो निपातितः ।) कफयुक्तः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पुं, श्लेष्मातकवृक्षः ।

"कफेलूः श्लेष्मातकतरौ पुंसीति रूपमञ्जरी" ।
इति "उज्ज्वलदत्तधृतवचनात्" ॥ १ । ९५ ॥)

कफोणिः, पुं, (कं सुखं स्फोरयति । स्फुर स्फुरणे सञ्चलने च ण्यन्तात् अच इः । अथवा केन सुखेन फणति स्फुरतीति वा । स्फुर, फण वा + इन् उभयतः पृषोदरादित्वात् साधुः ।) भुजमध्यग्रन्थिः । कनुइ इति भाषा ॥ तत्पर्य्यायः १ कूर्परः २ । इत्यमरः । २ । ६ । ८० ॥ (कूर्परशब्देऽस्य विशेषो ज्ञेयः ॥)

कब, ऋ ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट्-ऋदित् ।) वर्णः शुक्लादिक्रिया । ऋ अचकाबत् । ङ कबते कविर्विष्णुम् । कबते पतिमां चित्रकारः । इति दुर्गादासः ॥

कबन्धं, क्ली, (कस्य प्राणवायोः बन्धः आश्रयः । जलपानमेव प्राणधारणकारणम् । कदापि प्राणस्थितिः जलं विना नैव स्यात् । यथा, श्रुतिः ।